# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्
## सत्रान्तपरीक्षा-अक्टूबर-२०१९

कक्षा – शास्त्रीद्वितीयवर्षम् (SEM-3) प्रश्नपत्रम् – ६ गुणा: - ७०

विषय: - स्वामिनारायणवेदान्तः (S) कोड – CC236 (NEW) समय: - ०८ त: ११

दिनाङ्क: - १५-१०-२०१९ सन्दर्भग्रन्थः – भद्रेशस्वामिविरचित -गीताभाष्य

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः – १ कयोश्चिद् द्वयोः श्लोकयोः ससन्दर्भपूर्वकं व्याख्या कार्या।** १०

१. अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम्।
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम्॥

२. कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसम्मूढचेताः।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्॥

३. या निशा सर्वभूतानां तस्यां जागर्ति संयमी।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः॥

**प्रश्नः – २ एकं निबन्धात्मकोत्तरं लिखत।** १०

१. प्रथमाध्यायसारः।

२. गीतोक्तयोगशब्दमर्म।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ३ कयोश्चिद् द्वयोः श्लोकयोः ससन्दर्भपूर्वकं व्याख्या कार्या।** १०

१. तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः॥

२. ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।

ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ।।

३. न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ।।

**प्रश्नः – ४ एकं निबन्धात्मकोत्तरं लिखत ।** **१०**

१. अवतारवादगलितार्थः ।

२. कर्मकर्तव्योचितरीतिनिरूपणम् ।

## तृतीयान्वितिः(Unit - 3)

**प्रश्नः – ५ कयोश्चिद् द्वयोः श्लोकयोः ससन्दर्भपूर्वकं व्याख्या कार्या ।** **१०**

१. सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ।।

२. ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ।।

३. चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ।।

**प्रश्नः – ६ एकं निबन्धात्मकोत्तरं लिखत ।** **१०**

१. ब्रह्मनिर्वाणयोगप्रोक्ताऽक्षरब्रह्मभावाप्तब्रह्मरूपभक्तलक्षणानि ।

२. अभ्यासयोगवर्णनं तत्सारश्च ।

## चतुर्थान्वितिः (युनिट-4)

**प्रश्नः – ७ केषाञ्चन दशानामतिलघूत्तराणि देयानि ।** **१०**

१. पाण्डवपक्षे प्रथमशङ्खनादः केन कृतः ?

२. 'अश्रुपूर्णाकुलेक्षणम्' एतच्छब्दे स्थूलसूक्ष्मकारणेतित्रयमध्ये कस्य

भावः ?
३. 'नित्यसत्त्वस्थः' शब्दस्य कः अर्थः ?
४. भगवद्गीता कुत्र प्रोक्ता ?
५. गीताप्रोक्तयोगशब्दस्य अर्थः ?
६. स्वामिनारायणभाष्ये धर्मशब्दस्य कः अर्थः ?
७. कस्मादन्नसम्भवः ?
८. चातुर्वर्ण्यं केन सृष्टमस्ति ?
९. कस्य निग्रहः वायोरिव सुदुष्करं विद्यते ?
१०. 'सांख्ययोगयोः पृथक्त्वं वर्तते' इति के वदन्ति ?
११. पञ्चमाध्यायनाम किम् ?
१२. किं दुर्निग्रहं चलम् ?
१३. अभ्यासयोगो नाम कः अध्यायः ?
१४. वह्निः केन आव्रियते ?
१५. 'परन्तप' सम्बोधनं कस्य कृते प्रयुक्तम् ?

*****